# bRihatpArAsharahorAshAstramh 91-97

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૯૧-૯૭

## Document Information

Text title : bRihatpArAsharahorAshAstram.h 91-97

File name : par9197.itx

Category : jyotisha, sociology_astrology, bRihatpArAshara

Location : doc_z_misc_sociology_astrology

Transliterated by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Proofread by : Ahto Jarve ajarve at fms30.cca.rockwell.com

Latest update : November 1, 2010

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# bRihatpArAsharahorAshAstramh 91-97

# બૃહત્પારાશરહોરાશાસ્ત્રમ્ ૯૧-૯૭

અથ ગ્રહણજાતશાન્ત્યધ્યાયઃ ॥ ૯૧॥

સૂર્યેન્દુગ્રહણે કાલે યેષાં જન્મ ભવેદ્ દ્વિજ ।
વ્યાધિઃ કષ્ટં ચ દારિદ્ર્યં તેષાં મૃત્યુભયં ભવેત્ ॥ ૧॥

અતઃ શાન્તિં પ્રવક્ષ્યામિ જનાનાં હિતકાઙ્ક્ષયા ।
સૂર્યસ્યેન્દોશ્ચ ગ્રહેણં યસ્મિનૃક્ષે પ્રજાયતે ॥ ૨॥

તન્નક્ષત્રપતે રૂપં સુવર્ણેન પ્રકલ્પયેત્ ।
સૂર્યગ્રહે સૂર્યરૂપં સુવર્ણેન સ્વશક્તિતઃ ॥ ૩॥

ચન્દ્રગ્રહે ચન્દ્રરૂપં રજતેન તથૈવ ચ ।
રાહુરૂપં પ્રકુર્વીત સીસકેન વિચક્ષણઃ ॥ ૪॥

શુચૌ દેશે સમં સ્થાનં ગોમયેન પ્રલેપયેત્ ।
તત્ર ચ સ્થાપયેદ્ વસ્ત્રં નૂતનં સુમનોહરમ્ ॥ ૫॥

ત્રયાણામેવ રૂપાણાં સ્થાપનં તત્ર કારયેત્ ।
સૂર્યગ્રહે પ્રદાતવ્યં સૂર્યપ્રીતિકરં ચ યત્ ॥ ૬॥

રક્તાક્ષતં રક્તગન્ધં રક્તમાલ્યામ્બરાદિકમ્ ।
ચન્દ્રગ્રહે પ્રદાતવ્યં ચન્દ્રપ્રીતિકરં ચ યત્ ॥ ૭॥

શ્વેતગન્ધં શ્વેતપુષ્પં શ્વેતમાલ્યામ્બરાદિકમ્ ।
રાહવે ચ પ્રદાતવ્યં કૃષ્ણપુષ્પામ્બરાદિકમ્ ॥ ૮॥

દદ્યાન્નક્ષત્રનાથાય શ્વેતગન્ધાદિકં તથા ।
સૂર્યં સમ્પૂજયેદ્ધીમાનાકૃષ્ણેતિ ચ મન્ત્રતઃ ॥ ૯॥

અથા ચન્દ્રં ઇમે દેવા ઇતિ મન્ત્રેણ ભક્તિતઃ ।
દૂર્વાભિ પૂજયેદ્રાહું કયા ન ઇતિ મન્ત્રતઃ ॥ ૧૦॥

સૂર્યેન્દ્વોરર્કપાલાશમિદ્ભિર્જુહુયાત્ ક્રમાત્ ।
તથા ચ રાહોઃ પ્રીત્યર્થં દૂર્વાભિર્દ્વિજસત્તમ ॥ ૧૧॥

બ્રહ્મવૃક્ષસમિદ્ભિશ્ચ ભેશાય જુહુયાત્ પુનઃ ।
અભિષેકં તતઃ કુર્યાત્ જાતસ્ય કલહોદકૈઃ ॥ ૧૨॥

આચાર્યં પૂજયેદ્ભક્ત્યા સુશાન્તો વિજિતેન્દ્રિયઃ ।
બ્રાહ્મણાન્ ભોજયેત્વા તુ યથાશક્તિ વિસર્જયેત્ ॥ ૧૩॥

એવં ગ્રહણજાતસ્ય શાન્તિં કૃત્વા વિધાનતઃ ।
સર્વવિઘ્નં વિનિર્જિત્વા સૌભાગ્યં લભતે નરઃ ॥ ૧૪॥

## અથ ગણ્ડાન્તજાતશાન્ત્યધ્યાયઃ ॥ ૯૨॥

તિથિનક્ષત્રલગ્નાનાં ગણ્ડાન્તં ત્રિવિધં સ્મૃતમ્ ।
જન્મયાત્રાવિવાહાદૌ ભવેત્તન્નિધનપ્રદમ્ ॥ ૧॥

પૂર્ણાનન્દાખ્યયોસ્તિથ્યોઃ સન્ધૌ નાડીચતુષ્ટયમ્ ।
અધ ઊર્ધ્વં ચ મૈત્રેય તિથિગણ્ડાન્તમુચ્યતે ॥ ૨॥

રેવતીદાસ્રયોઃ સાપ્રમઘયોઃ શાક્રમૂલયોઃ ।
સન્ધૌ નક્ષત્રગણ્ડાન્તમેવં નાડીચતુષ્ટયમ્ ॥ ૩॥

મીનાજયોઃ કર્કિહર્યોર્લગ્નયોરલિચાપયોઃ ।
સન્ધૌ ચ લગ્નગણ્ડાન્તમધઊર્ધ્વં ઘટીમિતમ્ ॥ ૪॥

એષુ ચાભુક્તમૂલાખ્યં મહાવિઘ્નપદં સ્મૃતમ્ ।
ઇન્દ્રરાક્ષસયોઃ સન્ધૌ પઞ્ચાષ્ટઘટિકાઃ ક્રમાત્ ॥ ૫॥

અથ ગણ્ડાન્તજાતસ્ય શિશોઃ શાન્તિવિધિં બ્રુવે ।
ગણ્ડાન્તકાલજાતસ્ય સૂતકાન્ત્યદિને પિતા ॥ ૬॥

શાન્તિંશુભેઽહ્નિ વા કુર્યાત્ પશ્યેત્ તાવન્ન તં શિશુમ્ ।
વૃષભં તિથિગણ્ડાન્તે નક્ષત્રે ધનુમેવ ચ ॥ ૭॥

કાઞ્ચનં લગ્નગણ્ડાન્તે દદ્યાત્તદ્દોષપ્રશાન્તયે ।
આદ્યભાગે પ્રજાતસ્ય પિતુશ્ચાપ્યભિષેચનમ્ ॥ ૮॥

દ્વિતીયે તુ શિશોર્માતુરભિષેકં ચ કારયેત્ ।
સુવર્ણેન તદર્ધેણ યથાવિત્તં દ્વિજોત્તમ ।

તિથિભેષાદિરૂપં ચ કૃત્વા વસ્ત્રસમન્વિતમ્ ॥ ૯॥

ઉપચારૈર્યથાશક્તિ કલહોપરિ પૂજયેત્ ।
પૂજાન્તે સમિદન્નજ્યૈર્હોમં કુર્યાદ્યથાવિધિ ॥ ૧૦॥

બ્રાહ્મણાન્ ભોજયેત્ પશ્ચાદેવં દોષાત્પ્રમુચ્યતે ।
આયુરારોગ્યમૈશ્વર્યં સમ્પ્રાપ્નોતિ દિને દિને ॥ ૧૧॥

---

અથ અભુક્તમૂલશાન્ત્યધ્યાયઃ ॥ ૯૩॥

જ્યેષ્ઠામૂલમયોર્યસ્માદધિપાવિન્દ્રરાક્ષસૌ ।
મહાવૈરાત્ તયોઃ સન્ધિર્મહાદોષપ્રદઃ સ્મૃતઃ ॥ ૧॥

અભુક્તમૂલજં પુત્રં પુત્રીં વાઽપિ પરિત્યજેત્ ।
અથવાઽબ્દાષ્ટકં તાતસ્તન્મુખં ન વિલોકયેત્ ॥ ૨॥

તદ્દોષપરિહારાર્થમથ શાન્તિવિધિં બ્રુવે ।
તત્રાઽદૌ દોષબહુલ્યાન્ મૂલશાન્તિર્નિગદ્યતે ॥ ૩॥

જન્મતો દ્વાદશાહે વા તદૃક્ષે વા શુભે દિને ।
જાતસ્ય વાઽષ્ટમે વર્ષે શાન્તિં કુર્યાદ્ વિધાનતઃ ॥ ૪॥

સુસમે ચ શુભે સ્થાને ગોમયેનોપલેપિતે ।
મણ્ડપં સ્વગૃહાત્ પ્રાચ્યામુદીચ્યાં વા પ્રકલ્પયેત્ ॥ ૫॥

ચતુર્દ્વારસમાયુક્તં તોરણાદ્યૈરલઙ્કૃતમ્ ।
કુણ્ડં ગ્રહાદિયજ્ઞાર્થં તદ્બહિશ્ચ પ્રકલ્પયેત્ ॥ ૬॥

સુવર્ણેન તદર્ધેન તદર્ધાર્ધેન વા પુનઃ ।
નક્ષત્રદેવતારૂપં કુર્યાદ્ વિત્તાનુસારતઃ ॥ ૭॥

શ્યામવર્ણં મહોગ્રં ચ દ્વિશિરસ્કં વૃકાનનમ્ ।
ખડ્ગચર્મધરં તદ્વદ્ ધ્યેયં કુણપવાહનમ્ ॥ ૮॥

સુવર્ણસ્ય ચ મૂલ્યં વા સ્થાપયિત્વા પ્રપૂજયેત્ ।
સુવર્ણં સર્વદૈવત્યં યતઃ શાસ્ત્રેષુ નિશ્ચિતમ્ ॥ ૯॥

આચાર્યં વરયેત્ પશ્ચાત્ સ્વસ્તિવાચનુપૂર્વકમ્ ।
કલશસ્થાપનં કુર્યાત્ સ્વગૃહ્યોક્તવિધાનતઃ ॥ ૧૦॥

પઞ્ચગવ્યાદિકં ક્ષેપ્યં કલશે તીર્થવારિ ચ ।
શતૌષધ્યાદિકં તત્ર શતચ્છિદ્રઘટે ક્ષિપેત્ ॥ ૧૧॥

વંશપાત્રં ચ સંસ્થાપ્ય તત્ર વૈ પશ્ચિમામુખમ્ ।
અર્ચયેન્નિરૃતિં દેવં શુક્લવસ્ત્રાક્ષતાદિભિઃ ॥ ૧૨॥

ઇન્દ્રં તદધિદેવં ચ જલં પ્રત્યધિદૈવતમ્ ।
સ્વસ્વશાખોક્તમન્ત્રેણ પ્રધાનાદીન્પ્રપૂજયેત્ ॥ ૧૩॥

દેવાધિદેવપ્રીત્યર્થં હોમં કુર્યાદ્યથાવિધિ ।
અષ્ટોત્તરં સહસ્રં વા શતં વા નિયતેન્દ્રિયઃ ॥ ૧૪॥

મૃત્યુપ્રશમનાર્થં ચ મન્ત્રં ત્ર્યમ્બકં જપેત્ ।
પ્રાર્થયેચ્ચ તતો દેવમભિષેકાર્થમાદરાત્ ॥ ૧૫॥

ભદ્રાસનોપવિષ્ટસ્ય સસ્ત્રીપુત્રસ્ય મન્ત્રવિત્ ।
આચાર્યો યજમાનસ્ય કુર્યાત્ પ્રીત્યાભિષેચનમ્ ॥ ૧૬॥

વસ્ત્રાન્તરિતકુમ્ભાભ્યાં સ્નાપયેત્તદનન્તરમ્ ।
શુક્લામ્બરધરસ્તદ્વત્ શ્વેતગન્ધાનુલેપનઃ ॥ ૧૭॥

ધેનું પયસ્વિનીં દદ્યાદાચાર્યાય ચ શક્તિતઃ ।
ઋત્વિગ્ભ્યો દક્ષિણાં દદ્યાદ્ બ્રાહ્મણાંશ્ચાપિ ભોજયેત્ ॥ ૧૮॥

યત્પાપં યચ્ચ મે દૌઃસ્થ્યં સર્વગાત્રેષ્વવસ્થિતમ્ ।
તત્સર્વં ભક્ષયાજ્ય ત્વં લક્ષ્મીં પુષ્ટિં ચ વર્ધય ॥ ૧૯॥

અનેનૈવ તુ મન્ત્રેણ સમ્યગાજ્યં વિલોકયેત્ ।
મૂલગણ્ડોદ્ભવસ્તૈવં સર્પપાપં પ્રણશ્યતિ ॥ ૨૦॥

અથ જ્યેષ્ઠાદિ ગણ્ડશાન્ત્યધ્યાયઃ ॥ ૯૪॥

જ્યેષ્ઠાગણ્ડાન્તજાતસ્તુ પિતુઃ સ્વસ્ય ચ નાશકઃ ।
તસ્ય શાન્તિવિધિં વક્ષ્યે સર્વવિઘ્નોપશાન્તયે ॥ ૧॥

મૂલશાન્તિસમં સર્વમાત્રાપિ મણ્ડપાદિકમ્ ।
ઇન્દ્રોઽત્ર દેવતા તદ્વદધિદેવોઽનલસ્તથા ॥ ૨॥

વિજ્ઞેયં ચ તથા વિપ્ર રક્ષઃ પ્રત્યધિદૈવતમ્ ।
યથાશક્તિ સુવર્ણેન કુર્યાદિન્દ્રસ્વરૂપકમ્ ॥ ૩॥

વજ્રાઙ્કુશધરં દિવ્યં ગજરાજોપરિસ્થિતમ્ ।
શાલિતણ્ડુલસંયુક્તકુમ્ભસ્યોપરિ પૂજયેત્ ॥ ૪॥

સ્વસ્વગૃહ્યોક્તમન્ત્રેણ ગન્ધપુષ્પાક્ષતાદિભિઃ ।
અભિષેકં ચ હોમં ચ કુર્યાદ્ બ્રાહ્મણભોજનમ્ ॥ ૫॥

ઇન્દ્રસૂક્તં જપેદ્ ભક્ત્યા મન્ત્રં મૃત્યુઞ્જયં તથા ।
પ્રાર્થયેદિન્દ્રદેવં ચ તતઃ શાન્તિમવાપ્નુયાત્ ॥ ૬॥

અથ વા શક્ત્યભાવે તુ કુર્યાદ્ ગોદાનમેવ હિ ।
યતઃ સમસ્તભૂદાનાદ્ ગોદાનમતિરિચ્યતે ॥ ૭॥

મૂલેન્દ્રાહિમઘાગણ્ડજાતે દદ્યાદ્ ગવાં ત્રયમ્ ।
ગોયુગ્મં પૌષ્ણદાસ્રોત્થે ગણ્ડાન્તે ચ દ્વિજન્મને ॥ ૮॥

અન્યગણ્ડે ચ દુર્યોગે ગામેકાં હિ પ્રદાપયેત્ ।
ગોરભાવે ચ વિપ્રાય દદ્યાત્ તન્મૂલ્યમેવ હિ ॥ ૯॥

જ્યેષ્ઠનક્ષત્રજા કન્યા વિનિહન્તિ ધવાગ્રજમ્ ।
વિશાખાન્ત્યપદોત્પન્ના કન્યા દેવરઘાતિની ॥ ૧૦॥

તસ્યાઃ પ્રદાનકાલેઽતો ગોદાનમપિ કારયેત્ ।
આશ્લેષાન્ત્યત્રિપાદોત્થૌ મૂલાદ્યત્રિપદોદ્ભવૌ ॥ ૧૧॥

કન્યાસુતૌ હતઃ શ્વશ્રૂં શ્વશુરઞ્ચ યથાક્રમમ્ ।
તયોર્વિવાહકાલેઽતઃ શાન્તિં કુર્યાદ્ વિચક્ષણઃ ॥ ૧૨॥

તત્તદોષવિનાશાય યથાવિત્તાનુસારતઃ ।
ધવાગ્રજદ્યભાવે તુ ન દોષાય પ્રજાયતે ॥ ૧૩॥

---

## અથ ત્રીતરજન્મશાન્ત્યધ્યાયઃ ॥ ૯૫॥

અથાઽન્યત્ સમ્પ્રવક્ષ્યામિ જન્મદોષપ્રદં દ્વિજ ।
સુતત્ર્યે સુતાજન્મ તત્ત્રયે સુતજન્મ ચેત્ ॥ ૧॥

તદાઽરિષ્ટભયં જ્ઞેયં પિતૃમાતૃકુલદ્વયે ।
તત્ર શાન્તિવિધિં કુર્યાદ્ વિત્તશાઠ્યવિવર્જિતઃ ॥ ૨॥

સૂતકાન્તેઽથ વા શુદ્ધે સમયે ચ શુભે દિને ।

આચાર્યમૃત્વિજો વૃત્વા ગ્રહયજ્ઞપુરસ્સરમ્ ॥ ૩॥

બ્રહ્મવિષ્ણુ મહેશેન્દ્રપ્રતિમાઃ સ્વર્ણજાઃ શુભાઃ ।
પૂજયેદ્ ધાન્યરાશિસ્થકલશોપરિ ભક્તિતઃ ॥ ૪॥

ચત્વારિ રુદ્રસૂક્તાનિ શાન્તિસૂક્તાનિ સર્વશઃ ।
વિપ્ર એકો જપેદ્ હોમકાલે ચ સુચિસંયતઃ ॥ ૫॥

આચાર્યો જુહુયાત્તત્ર સમિદાજ્યતિલાંશ્ચરુમ્ ।
અષ્ટોત્તરં સહસ્રં વા શતં વાઽષ્ટૌ ચ વિંશતિમ્ ॥ ૬॥

બ્રહ્માદિસર્વદેવેભ્યઃ સ્વસ્વગૃહ્યોક્તમન્ત્રતઃ ।
તતઃ સ્વિષ્ટકૃતં હુત્વા બલિં પૂર્ણાહુતિં પુનઃ ॥ ૭॥

અભિષેકં ચ જાતસ્ય સકુટુમ્બસ્ય કારયેત્ ।
ઋત્વિગ્ભ્યો દક્ષિણાં દદ્યાદ્ બ્રાહ્મણાંશ્ચાપિ ભોજયેત્ ॥ ૮॥

કાંસ્યાજ્યવીક્ષણં કૃત્વા દીનાનાથાંશ્ચ તર્પયેત્ ।
એવં શાન્ત્યા ચ મૈત્રેય સર્વારિષ્ટં વિલીયતે ॥ ૯॥

---

## અથ પ્રસવવિકારશાન્ત્યધ્યાયઃ ॥ ૯૬॥

અથાઽહં સમ્પ્રવક્ષ્યામિ વિકારં પ્રસવોદ્ભવમ્ ।
યેનાઽરિષ્ટં સમસ્તસ્ય ગ્રામસ્ય ચ કુલસ્ય ચ ॥ ૧॥

અત્યલ્પે વાઽધિકે કાલે પ્રસવો યદિ જાયતે ।
હીનાઙ્ગોવાઽધિકાઙ્ગો વા વિશિરા દ્વિશિરાસ્તથા ॥ ૨॥

નાર્યા પશ્વાકૃતિર્વાપિ પશુષ્વપિ નરાકૃતિઃ ।
પ્રસવસ્ય વિકારોઽયં વિનાશાયોપજાયતે ॥ ૩॥

યસ્ય સ્ત્રિયાઃ પશુનાં વા વિકારાઃ પ્રસવોદ્ભવઃ ।
અનિષ્ટં ભવને તસ્ય કુલેઽપિ ચ મહદ્ ભવેત્ ॥ ૪॥

તદ્દોષપરિહારાર્થં શાન્તિઃ કાર્યા પ્રયત્નતઃ ।
સ્ત્રી વા ગૌવંઽવા વાપિ પરિત્યાજ્યા હિતાર્થિના ॥ ૫॥

નાર્યાઃ પઞ્ચદશે વર્ષે જન્મતઃ ષોડશોઽપિ વા ।
ગર્ભો વા પ્રસવો વાઽપિ ન શુભાય પ્રજાયતે ॥ ૬॥

સિંહરાશિસ્થિતેઽર્કે ગૌનક્રસ્થે મહિષી તથા ।
પ્રસૂતા સ્વામિનં હન્તિ સ્વયં ચાપિ વિનશ્યતિ ॥ ૭॥

બ્રાહ્મણાય પ્રદદ્યાત્ તાં શાન્તિં વાપિ સમાચરેત્ ।
બ્રહ્મવિષ્ણુમહેશાનાં ગ્રહાણાં ચૈવ પૂજનમ્ ॥ ૮॥

સર્વં હોમાદિકં કર્મ કુર્યાત્ ત્રિતરશાન્તિવત્ ।
તતો ગૃહો સુખી ભૂત્વા સર્વપાપૈઃ પ્રમુચ્યતે ॥ ૯॥

એવં ત્વરિષ્ટે સમ્પ્રાપ્તે નરઃ શાન્તિં કરોતિ યઃ ।
સર્વાન્ કામાનવાપ્નોતિ ચિરજીવી સુખી ચ સઃ ॥ ૧૦॥

અથોપસંહારાધ્યાયઃ ॥ ૯૭॥

યચ્છાસ્ત્રં બ્રહ્મણા પ્રોક્તં નારદાય મહાત્મને ।
તદેવ શૌનકાદિભ્યો નારદઃ પ્રાહ સાદરમ્ ॥ ૧॥

તતો મયા યથા જ્ઞાતં તુભ્યમુક્તં તથા દ્વિજ ।
નાસૂયકાય દાતવ્યં પરનિન્દારતાય વા ॥ ૨॥

જડાય દુર્વિનીતાય નાજ્ઞાતાય કદાચન ।
દેયમેતત્સુરિલાય ભક્તાય સત્યવાદિને ॥ ૩॥

મેધાવિને વિનીતાય સમ્યગ્ જ્ઞાતકુલાય ચ ।
પુણ્યદં જ્યૌતિષં શાસ્ત્રમગ્ર્યં વેદાઙ્ગમુત્તમમ્ ॥ ૪॥

જાનાતિ કાલમાનં યો ગ્રહર્ક્ષાણાં ચ સંસ્થિતિમ્ ।
હોરાશાસ્ત્રમિદં સમ્યક્ સ વિજાનાતિ નાઽપરઃ ॥ ૫॥

હોરાશાસ્ત્રાર્થતત્ત્વજ્ઞઃ સત્યવાગ્ વિજિતેન્દ્રિયઃ ।
શુભાઽશુભં ફલં વક્તિ સત્યં તદ્વચનં ભવેત્ ॥ ૬॥

યે સુશાસ્ત્રં પઠન્તીદં યે વા શ‌ૃણ્વન્તિ ભક્તિતઃ ।
તેષાંમાયુર્બલં વિત્તં વૃદ્ધિમેતિ યશઃ સદા ॥ ૭॥

ઇત્થં પરાશરેણોક્તં હોરાશાસ્ત્રં ચમત્કૃતમ્ ।
નવં નવજનપ્રીત્યૈ વિવિધાધ્યાયસંયુતમ્ ॥ ૮॥

શ્રેષ્ઠં જગદ્ધિતાયેદં મૈત્રેયાય દ્વિજન્મને ।
તતઃ પ્રચરિતં પૃથ્વ્યામાદૃતં સાદરં જનૈઃ ॥ ૯॥

ગ્રન્થેઽસ્મિન્ પૃથગધ્યાયૈર્વિષયા વિનિવેશિતાઃ ।
સૃષ્ટિક્રમોઽવતારાશ્ચ ગુણાઃ ખેટસ્ય ભસ્ય ચ ॥ ૧૦॥

વિશેષલગ્નં વર્ગાશ્ચ તદ્વિવેકશ્ચ રાશિદૃક્ ।
અરિષ્ટં તદ્વિભઙ્ગશ્ચ વિવેકો ભાવજસ્તથા ॥ ૧૧॥

ભાવાનાં ચ ફલાધ્યાયો ભાવેશોત્થફલં તથા ।
અપ્રકાશફલં સ્પષ્ટખેટદૃષ્ટિપ્રસાધનમ્ ॥ ૧૨॥

તતઃ સ્પષ્ટબલાધ્યાયઃ ઇષ્ટકષ્ટપ્રસાધનમ્ ।
પદં ચોપપદં તદ્વદર્ગલા ત્વથ કારકાઃ ॥ ૧૩॥

કારકાંશફલં યોગકારકાધ્યાય એવ ચ ।
નાભસા વિવિધા યોગાશ્ચન્દ્રયોગોઽર્કયોગકઃ ॥ ૧૪॥

રાજયોગસ્તતઃ પ્રોક્તો રાજસમ્બન્ધયોગકઃ ।
વિશેષધનયોગાશ્ચ યોગા દારિદ્ર્યકારકાઃ ॥ ૧૫॥

આયુર્મારકભેદાશ્ચ ગ્રહાવસ્થાઃ ફલાન્વિતાઃ ।
નાનાવિધદશાધ્યાયાસ્તત્ફલાધ્યાયઃ સંયુતાઃ ॥ ૧૬॥

અન્તઃપ્રત્યન્તરપ્રાણસૂક્ષ્મસંજ્ઞાશ્ચ તદ્ભિદાઃ ।
સૂર્યાદ્યષ્ટકવર્ગશ્ચ ત્રિકોણપરિશોધનમ્ ॥ ૧૭॥

એકાધિપત્યસંશુદ્ધિસ્તતઃ પિણ્ડપ્રસાધનમ્ ।
તતશ્ચાઽષ્ટકવર્ગાણાં પ્રસ્ફુટાનિ ફલાનિ ચ ॥ ૧૮॥

તતોઽપ્યષ્ટકવર્ગાયુઃસાધનં ચ તતઃ પરમ્ ।
સમુદાયાષ્ટવર્ગોત્થફલાધ્યાયઃ પરિસ્ફુટઃ ॥ ૧૯॥

ગ્રહરશ્મિફલાધ્યાયઃ સુદર્શનફલં તથા ।
મહાપુરુષચિહ્નાનિ મહાભૂતફલાનિ ચ ॥ ૨૦॥

ગુણત્રયફલાધ્યાયસ્તતોઽપ્યજ્ઞાતજન્મનામ્ ।
જન્મલગ્નાદિવિજ્ઞાનં પ્રવ્રજ્યાલક્ષણાનિ ચ ॥ ૨૧॥

સ્ત્રીણાં ચ ફલવૈશિષ્ટ્યમઙ્ગલક્ષ્મફલાનિ ચ ।
પૂર્વપાપોત્થશાપોત્થયોગા વૈપુત્ર્યકારકાઃ ॥ ૨૨॥

સત્પુત્રપ્રાપ્ત્યુપાયાશ્ચ સહૈવ પ્રતિપાદિતાઃ ।

જન્મન્યનિષ્ટલગ્નર્ક્ષતિથ્યાદિપ્રતિપાદનમ્ ॥ ૨૩॥

તત્તચ્છાન્તિવિધિશ્ચૈવ સંક્ષેપેણ પ્રદર્શિતઃ ।
પ્રસવસ્ય વિકારાશ્ચ કથિતાઃ શાન્તિસંયુતાઃ ॥ ૨૪॥

એવં જાતકવર્ગેઽત્ર નિવિષ્ટા વિષયાઃ શતમ્ ।
વિજ્ઞાય વિબુધાસ્ત્વેતાન્ પ્રાપ્નુવન્તુ યશઃ શ્રિયમ્ ॥ ૨૫॥

---

Encoded and proofread by ajarve at fms30.cca.rockwell.com (Ahto Jarve)

---

*bRihatpArAsharahorAshAstramh 91-97*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*